# Vishnorashtottarashatanamastotram

# વિષ્ણોરષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : viShNoraShTottarashatanAmastotram

File name : viShNoraShTottarashatanAmastotram.itx

Category : vishhnu, aShTottarashatanAma

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : See corresponding nAmAvalI

Latest update : Septyember 15, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 11, 2023

*sanskritdocuments.org*

# વિષ્ણોરષ્ટોત્તરશતનામસ્તોત્રમ્

વિષ્ણુર્જિષ્ણુર્વષટ્કારો દેવદેવો વૃષાકપિઃ ।
દામોદરો દીનબન્ધુરાદિદેવોઽદિતેઃ સુતઃ ॥ ૧॥

પુણ્ડરીકઃ પરાનન્દઃ પરમાત્મા પરાત્પરઃ ।
પરશુધારી વિશ્વાત્મા કૃષ્ણઃ કલિમલાપહઃ ॥ ૨॥

કૌસ્તુભોદ્ભાસિતોરસ્કો નરો નારાયણો હરિઃ ।
હરો હરપ્રિયઃ સ્વામી વૈકુણ્ઠો વિશ્વતોમુખઃ ॥ ૩॥

હૃષીકેશોઽપ્રમેયાત્મા વરાહો ધરણીધરઃ ।
વામનો વેદવક્તા ચ વાસુદેવઃ સનાતનઃ ॥ ૪॥

રામો વિરામો વિરજો રાવણારી રમાપતિઃ ।
વૈકુણ્ઠવાસી વસુમાન્ ધનદો ધરણીધરઃ ॥ ૫॥

ધર્મેશો ધરણીનાથો ધ્યેયો ધર્મભૃતાં વરઃ ।
સહસ્રશીર્ષા પુરુષઃ સહસ્રાક્ષઃ સહસ્રપાત્ ॥ ૬॥

સર્વગઃ સર્વવિત્સર્વઃ શરણ્યઃ સાધુવલ્લભઃ ।
કૌસલ્યાનન્દનઃ શ્રીમાન્ રક્ષઃકુલવિનાશકઃ ॥ ૭॥

જગત્કર્તા જગદ્ધર્તા જગજ્જેતા જનાર્તિહા ।
જાનકીવલ્લભો દેવો જયરૂપો જલેશ્વરઃ ॥ ૮॥

ક્ષીરાબ્ધિવાસી ક્ષીરાબ્ધિતનયાવલ્લભસ્તથા ।
શેષશાયી પન્નગારિવાહનો વિષ્ટરશ્રવાઃ ॥ ૯॥

માધવો મધુરાનાથો મોહદો મોહનાશનઃ ।
દૈત્યારિઃ પુણ્ડરીકાક્ષો હ્યચ્યુતો મધુસૂદનઃ ॥ ૧૦॥

સોમસૂર્યાગ્નિનયનો નૃસિંહો ભક્તવત્સલઃ ।
નિત્યો નિરામયઃ શુદ્ધો નરદેવો જગત્પ્રભુઃ ॥ ૧૧॥

હયગ્રીવો જિતરિપુરુપેન્દ્રો રુક્મિણીપતિઃ ।
સર્વદેવમયઃ શ્રીશઃ સર્વાધારઃ સનાતનઃ ॥ ૧૨॥

સામ્યઃ સૌમ્યપ્રદઃ સ્રષ્ટા વિષ્વક્સેનો જનાર્દનઃ ।
યશોદાતનયો યોગી યોગશાસ્ત્રપરાયણઃ ॥ ૧૩॥

રુદ્રાત્મકો રુદ્રમૂર્તિઃ રાઘવો મધુસૂદનઃ ।
ઇતિ તે કથિતં દિવ્યં નામ્નામષ્ટોત્તરં શતમ્ ॥ ૧૪॥

સર્વપાપહરં પુણ્યં વિષ્ણોરમિતતેજસઃ ।
દુઃખદારિદ્ર્યદૌર્ભાગ્યનાશનં સુખવર્ધનમ્ ॥ ૧૫॥

સર્વસમ્પત્કરં સૌમ્યં મહાપાતકનાશનમ્ ।
પ્રાતરુત્થાય વિપ્રેન્દ્ર પઠેદેકાગ્રમાનસઃ ।
તસ્ય નશ્યન્તિ વિપદાં રાશયઃ સિદ્ધિમાપ્નુયાત્ ॥ ૧૬॥

ઇતિ શાક્તપ્રમોદતઃ વિષ્ણોઃ અષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Vishnorashtottarashatanamastotram*

pdf was typeset on March 11, 2023

Please send corrections to *sanskrit@cheerful.com*